गणेशकवचम्
(स्कन्दपुराणे)
शिवकवचम्

१०३२

२५१

सं. २०३२-६९ १
गणपतिवज्रपंजरकवचम्

श्रीगणेशायनमः ॐ श्रीभैरवौवाच महादेवीगणेशस्यवरदस्यमहात्मनः
कवचंतेप्रवक्ष्यामिवज्रपंजरकाभिदं ॐ अस्यश्रीमहागणपतिवज्रपंज
रकवचस्य श्रीनारदऋषिः गायत्रींछंदः श्रीमहागणपतिर्देवता गंबीजं
ह्रींशक्तिः कुरुकीलकं आत्मनोःवाङ्मनःकायोपार्जितपापनिवारणार्थं॥
श्रीधर्मार्थकाममोक्षार्थेवज्रविद्यासिद्ध्यर्थेमहागणपतिवज्रपंजरकव
चपाठेविनियोगः अथगायत्री तत्पुरुषायविद्महेवक्रतुंडायधीमहि त
न्नोदंतेप्रचोदयात् ३ अथध्यानम् ओंविघ्नेशंविश्ववंद्यंसुविपुलयशसं
लोकरक्षाप्रदक्षं साक्षात्सर्वापदासप्रशमनसमतिंपार्वतीप्राणसूनुं।
पापात्सर्वान्सुरेंद्रास्त्रखरमनिशंसाधकैःपूज्यमानं कारुण्येनांतरा
यामितभयशमनंविघ्नराजंनमामि ॐ श्रीं ह्रीं गं शिरः पातुमहागणपति
प्रभ विनायकोललाटंमेविघ्नराजोभ्रुवोमम पातुनेत्रेगणाध्यक्षोनासि
कांमेगजाननः श्रुतीमेवतुहेरंबोगंडोमेमोदकाशनः द्वैमातरोमुखंपातु
चाधरोपातुरंदमः दंतोममैकदंतोव्याद्वक्रतुंडोवतादसां नांगेयोमेगलंपा
तुस्कंदौसिंहासनोवतु विघ्नांतकोभुजौपातुहस्तौमूषकवाहनः उरोननना
वतान्नित्यंदेवास्त्रिपुरघातनः हृदयंमेकुमारोव्याद्दयंनोपार्श्वउग्मकं॥

ग० प्रद्युम्नोमेवतात्पृष्ठंनाभिंशंकरनंदनः कटिंनंदगणःपातुशिश्नंवीरेश्वरोवतु।
१ मेढ्रंमेवतुसौभाग्योभृंगिरीटीचगुह्यकं विराटकोवतादूरूजानुमेपुष्पदंतकः
जंघेममविकालौव्याद्गुल्फौवन्यगुणोवतु पादौचित्तगणःपातुपादाधोलो।
हितोवतु पादएषंसुंदरोव्यान्नूपुराद्योवपुर्मम विदारोजठरंपातुभूतानिचो
ग्ररूपकः शिरसःपादपर्यंतंवपुःसप्तगणोवतु पादादिमूर्धपर्यंतंवपुःपातु
नुचिंतकः विस्मारितंतुयस्थानंगणेशास्तत्सदावतु पूर्वेमांह्रींकरालोव्यादा
ग्नेयेविकरालकः दक्षिणेपातुसंहारोनैरृतेरुरुभैरवः पश्चिमायांमहाका
लोवायौकालाग्निभैरवः उत्तरेमांसिमाव्याद्ईशान्यामपितात्मकः प्रभाते
शतपत्रोव्यात्सहस्रारस्तुमध्यमे दंतमालादिनांतेव्यान्निशापात्रंसदावतु क
लशोमांनिशीथेव्यान्निशांतेपरशुस्तथा सर्वत्रसर्वदापातुशंखयुग्मंस
दावतु ओंओंराजकुलेहहोरणेभयह्रींह्रींहुंघूतेवतात् श्रींश्रींशत्रुगृहेशौ
जलभयेक्लींक्लींवनांतेवतु ग्लौंगलूंग्लैंग्लींसत्वभीतिषुमहाव्याध्यार्तिषुः
ग्लौंगंगौ नित्यंयक्षपिशाचभूतफणिषुग्लौंगंगणेशोवतु इतीदंकवचंपु
ण्यंसर्वतंत्रेषुगोपितं वज्रपंजरनामानंगणेशस्यमहात्मनः अंगभूतंतंत्र १
मयंसर्वाचारैकसाधनं विधानेननसिद्धिःस्यात्सजनस्यजपस्यच तस्मात्

पूजनं पुण्यं पठेद्वा धारयेत्सदा तस्य सिद्धिर्महादेवि करस्था पारलौकिकी यं
यं कामयते कामं तं तं प्राप्नोति पाठकः अर्धरात्रे पठेन्नित्यं सर्वाभिष्टफलं ल
भेत् इति गुह्यं सुकवचं महागणपतेः प्रियं सर्वसिद्धिमयं पुण्यं गोपयेत्पर
मेश्वरी इति श्रीगणेशकवचं संपूर्णं ॐ ॥ ॐ नमः शिवाय ॐ अस्य श्री
शिवकवचस्तोत्रमंत्रस्य श्रीब्रह्मा ऋषिः गायत्री छंदः श्रीसदाशिवो देवता
रां बीजं रीं शक्तिः रूं कीलकं आत्मनो वाङ्मनःकायोपार्जितपापनिवारणा
र्थं मम रुद्रसाक्षात्कारे शिवकवचपाठे विनियोगः अथ गायत्री ॐ तत्पुरुषा
य विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् अथ ध्यानं ॐ वंदे रुद्र
उमापतिं सुरगुरुं वंदे जगत्कारणं वंदे पन्नगभूषणं शिवधरं वंदे पशूनां प
तिं वंदे सूर्यशशांकवह्निनयनं वंदे मुकुंदप्रियं वंदे शैलसुतामनोहरतरं वंदे
शिवं शंकरं ॐ सकलतत्वात्मकाय सकलतत्वविदूराय सकललोकैककर्
त्रे सकललोकैकभर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकल
लोकनिगमगुह्याय सकललोकवरप्रदाय सकलदुःखार्तिभंजनाय सक
लजगदभयंकराय सकललोकैकशंकराय शशांकशेखराय शाश्वतनि
जावासाय निर्गुणाय निरुपमाय निराभासाय निरामयाय निःप्रपंचाय

शि० निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय निरूपमविभवाय निराधाराय
२ नित्यशुद्धपरिपूर्णसच्चिदानंदाय परमशांतप्रकाशतेजोरूपाय जयजय रुद्ररु
द्र महारौद्र वीरभद्रावतार महाभैरव कल्पांतभैरव कालभैरव कपालमालाध
र खड्ग खट्वांग चर्म पाशांकुश डमरू त्रिशूल चाप बाण गदा शक्तिः भिंडिपाल
तोमर समुसल मुद्गर प्रास पाश परिघ पट्टिस भुसुंडी शतघ्नी चक्रायुध भीषण
कर सहस्रमुख दंष्ट्राकराल विकटाट्टहास विस्फूर्जित ब्रह्मांडमंडल नागेंद्रकुं
डल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक
विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख सर्व
तो रक्ष २ ज्वल २ महामृत्युंजय २ अपमृत्युभयं नाशय २ रोगभयमुत्सादय २
विषसर्पभयं शमय २ चौरान्मारय २ मम शत्रूनुच्चाटय २ त्रिशूलेन विदार
य २ कुठारेण भिंधि २ खड्गेन छिंधि २ खट्वांगेन विपोथय २ मुशलेन निःशेष
य २ बाणैः संताडय २ रक्षांसि भीषय २ भूतानि विद्रावय २ कूष्मांडवेताल मा
रीगण ब्रह्मराक्षसान् संत्रासय २ ममाभयं कुरु २ वित्रस्तं मामाश्वासय २ नरक
भयान्मामुद्धर २ संजीवय २ क्षुत्तृडार्तिनिवारय २ दुःखातुरमानंदय २ शिव २
कवचेन मामाच्छादय २ त्र्यंबकं नमस्ते २ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शि
वकवचं संपूर्णम् शुभं भवतु १९ ॥